यः ।) चूँड़ः । इषुः । (यथा, रघुः । ९ । ७५ ।
"शल्यप्रोतं प्रेक्ष्य सकुम्भं मुनिपुत्त्रं
तापादन्तःशल्य इवासीत् क्षितिपोऽपि ॥")
तोमरम् । इति मेदिनी ॥ वंशकम्बिका । इति विश्वः ॥ दुःखहम् । दुर्व्वाक्यम् । इति शब्दरत्नावली ॥ पापम् । इति त्रिकाण्डशेषः ॥ अस्थि । यथा । अथ शल्योद्धारविधिः ।
"सुनिश्चितां मन्दिरभूमिमादौ
निखाय तोयावधि यत्नतस्ताम् ।
कुर्य्याद्विशल्यामथवा नृमानं
खात्वाथवा प्रश्नवशाद्विधिज्ञः ॥
दूर्व्वाप्रवालाक्षतपुष्पपाणिः
शुचिः शुचिं दैवविदं समेत्य ।
पृच्छेद्विनीतो मधुरस्वरेण
शल्यस्य तत्त्वं भवने तदीयः ॥
ततः प्रश्नादिमो वर्णः सन्धार्य्यो यत्नतोऽथवा ।
क्रमात् पुष्पःपगादेव फलानां आख्यादितः ॥
प्रणवो धरणी धारिणी करौ च तदनन्तरम् ।
न भूत्ये नम इत्येव मन्त्रो वह्निप्रियान्तकः ॥"
वह्निप्रिया स्वाहा ।
"मन्त्रेणानेन कठिनीमभिमन्त्र्य विभाजयेत् ।
नवधा सदनक्षेत्रं तया पश्चाद्विलेखयेत् ॥
ब-क-च-त-ए-हाः श-प-षा नव चेत् प्रश्न
वर्णाश्च जायन्ते ।
प्रागादिकोष्ठे नवके वर्णास्ते शल्यमाख्यान्ति ॥
प्रश्ने बकारः पुरतो नरास्थि
ब्रवीति शल्यं मरणप्रदायि ।
चौणीग्निदक्कोरगहेतुमत्तु-
प्रदं ककारः खरशल्यमग्नौ ॥
याम्यां चकारः नृवगास्थि वेश्म
प्रभोर्व्विनाशं प्रकरोति शल्यम् ।
रक्षोदिशि श्वास्थिरहस्थितानां
महद्भयं वक्ति सुनिश्चितं तः ॥
एः पाश्चिदिश्यस्थि शिशोर्ब्रवीति
म्लत्तुं प्रवासादृहमेव शल्यम् ।
हो वायुकोणे नरकूपमस्थि
दारिद्र्यमित्रक्षयकद्विधत्ते ॥"
धनपदिशि शकारः प्राह विप्रास्थि वित्त-
क्षयकृदथ षकारो वक्ति कन्यास्थि शम्भौ ।
तदिह कुलविनाशं गोधनानाञ्च हानिं
वितरति गृहनाथस्यापि शुभस्य देवैः ॥
यो मध्यभागे भवितं कपालं
कालायसं चाह कुलक्षयाय ।
यत्नादपास्यान्यधना प्रमाणं
सर्व्वत्र तथ्यं कथयामि शल्ये ॥
इन्द्रयमोजलेशाने शल्यं साहंकरे कटौ ।
वह्न्यन्तककुबेरेषु पुरुषे मध्यवातयोः ॥"
देवीपुराणम् ।
"पुरुषाधःस्थितं शल्यं न गृहे दोषदं भवेत् ।
प्रासादे दोषदं शल्यं भवेद्यावज्जलान्तकम् ॥
गृहारम्भेऽतिकण्डूतिः स्वाम्यङ्गे यदि जायते ।
शल्यं त्वपनयेत्तत्र प्रासादे भवनेऽपि वा ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
सप्त शल्यानि यथा,—
"नृपो न हरिसेवको यवधनो न कन्यार्पकः
कविर्न सुरजित् कविः श्रुतगुरुर्न सद्देशावः ।
गुणी न भगवत्परो रसिकधीर्न कृष्णाश्रयः
स न प्रवजनानुगो जगति सप्त शल्यानि च ॥"
इति पाद्मोत्तरखण्डे १०० अध्यायः ॥
शल्यः, पुं, (शल गतौ+यः ।) मदनवृक्षः । श्वावित् । इत्यमरः ॥ (यथा, भागवते । ८ । २ । २२ ।
"वृका वराहा महिषर्क्षशल्या
गोपुच्छशालावृकमर्कटाश्च ॥")
नृपभेदः । स तु युधिष्ठिरमातुलः । (अयं हि दुर्य्योधनेन कापट्यात् वशीकृतः कुरुपाण्डवयुद्धे दुर्य्योधनपक्षं समाश्रयत् । यथा, महाभारते । १ । २ । २१६ ।
"मद्रराजश्च राजानमायान्तं पाण्डवान् प्रति ।
उपहारैर्व्वञ्चयित्वा वर्त्मन्येव सुयोधनः ॥
वरदं तं वरं वव्रे साहाय्यं क्रियतां मम ।
शल्यस्तस्मै प्रतिश्रुत्य जगामोद्दिश्य पाण्डवान् ॥"
कर्णार्ज्जुनयोर्द्वैरथयुद्धे शल्यस्य कर्णतेजो भङ्गकरणे प्रतिज्ञा । यथा, तत्रैव । ५ । ८ । ३७-४५ ।
युधिष्ठिर उवाच ।
"सुकृतं ते कृतं राजन् ! प्रच्छन्नेनात्मनात्मना ।
दुर्य्योधनस्य यद्वीर त्वया वाचा प्रतिश्रुतम् ॥
एकं त्विच्छामि भद्रन्ते क्रियमाणं महीपते ।
राजन्नकर्त्तव्यमपि कर्त्तुमर्हसि मातुल ॥
मम त्ववेक्षया वीर शृणु विज्ञापयामि ते ।
भवानिह महाराज वासुदेवसमो युधि ॥
कर्णार्ज्जुनाभ्यां संप्राप्ते द्वैरथे राजसत्तम ।
कर्णस्य भवता कार्य्यं सारथ्यं नात्र संशयः ॥
तत्र पाल्योऽर्ज्जुनो राजन् यदि मत्प्रियमिच्छसि ।
तेजोवधश्च ते कार्य्यः सौतेरस्मज्जयावहः ।
अकर्त्तव्यमपि ह्येतत् कर्त्तुमर्हसि मातुल ॥
शल्य उवाच ।
शृणु पाण्डव भद्रं ते यद्ब्रवीषि दुरात्मनः ।
तेजोवधनिमित्तं मां सूतपुत्त्रस्य संयुगे ॥
अहं तस्य भविष्यामि संग्रामे सारथिर्ध्रुवम् ।
वासुदेवेन हि समं नित्यं मां स हि मन्यते ॥
तस्याहं कुरुशार्दूल प्रतीपमहितं वचः ।
ध्रुवं सन्धयिष्यामि योद्धुकामस्य संयुगे ।
यथा च हृतदर्पश्च हृततेजाश्च पाण्डव ।
भविष्यति सुखं हन्तुं सत्यमेतद्ब्रवीमि ते ॥"
युधिष्ठिरस्तु एनं हतवान् । एतद्वृत्तान्तस्तु महाभारते शल्यपर्व्वणि १७ अध्याये द्रष्टव्यः ॥)
सीमा । शलाका । इति हेमचन्द्रः ॥ विल्ववृक्षः । मत्स्यभेदः । इति राजनिर्घण्टः ॥ * ॥
शल्यनिःसरणौषधं यथा,—
"रुद्र लाङ्गलिकामूलं छिन्नस्य तथैव च ।
तेन व्रणमुखं लिप्तं शल्यो निःसरति व्रणात् ।
चिरकालप्रविष्टोऽपि तेन मार्गेण शङ्कर ॥"
इति गारुड़े १८३ अध्यायः ॥

शल्यः, पुं, क्ली, शस्त्रविशेषः । शेल इति भाषा । तत्पर्य्यायः । शङ्कुः २ । इत्यमरः ॥ दीर्घायुधः ३ शलः ४ कुन्तः ५ विषाङ्कुरः ६ । इति त्रिकाण्डशेषः ॥
शल्यकः, पुं, (शल्य इव । शल्य+इवार्थे कन् ।) मदनवृक्षः । इति शब्दरत्नावली ॥ शल्लकीजन्तुः । इति राजनिर्घण्टः ॥ (यथा, मनुः । ५ । १८ ।
"श्वाविधं शल्यकं गोधां खड्गकूर्म्मशशांस्तथा ।
भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतः ॥")
शल्यकण्ठः, पुं, (शल्यं तद्वल्लोम कण्ठेऽपि यस्य ।) शल्लकी । इति शब्दचन्द्रिका ॥
शल्यलोम, [न्] क्ली, (शल्यवत् लोम ।) शलली । इति राजनिर्घण्टः ॥
शल्यारिः, पुं, (शल्यस्य अरिस्तन्नाशकत्वात् ।) युधिष्ठिरराजः । इति हेमचन्द्रः ॥
शल्ल, गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) शल्लति । इति दुर्गादासः ॥ सौत्रधातुरयम् ॥
शल्लं, क्ली, त्वक् । इति शब्दरत्नावली ॥
शल्लः, पुं, भेकः । इति शब्दरत्नावली ॥
शल्लकं, क्ली, (शल्लमेव । स्वार्थे कन् ।) त्वक् । इति शब्दरत्नावली ॥
शल्लकः, पुं, श्योनाकवृक्षः । इति जटाधरः ॥ (शल्लकीजन्तुः । यथा, याज्ञवल्क्ये । १ । १७७ ।
"भक्ष्याः पञ्चनखाः सेधा गोधाकच्छपशल्लकाः ।
शशाश्च मत्स्येष्वपि हि सिंहतुण्डकरोहिताः ॥")
शल्लकी, स्त्री, पशुविशेषः । शजारु इति वङ्गभाषा । साहिल इति हिन्दीभाषा ॥ तत्पर्य्यायः । श्वावित् २ शलका ३ शल्यः ४ । इति जटाधरः ॥ क्रकचपादः ५ छेदारः ६ । इति शब्दरत्नावली ॥ शल्यकः ७ शल्यमृगः ८ वज्रशल्यः ९ विलेशयः १० । अस्या मांसगुणाः ।
"शल्यमांसं गुरु स्निग्धं शीतलं कफपित्तजित् ॥"
इति राजनिर्घण्टः ॥
भावप्रकाशोक्तगुणाः विलेशयशब्दे द्रष्टव्याः ॥ वृक्षविशेषः । (यथा, रामायणे । २ । ५५ । ६ ।
"क्रोशमात्रं ततो गत्वा नीलं प्रेक्ष्य च काननम् ।
शल्लकीवदरीमिश्रं राम वन्यैश्च यामुनैः ।
स पन्थाश्चित्रकूटस्य गतस्य बहुशो मया ॥")
तत्पर्य्यायः । गजभक्ष्या २ सुवहा ३ सुरभिः ४ रसा ५ महेरणा ६ कुन्दुरुकी ७ ह्रादिनी ८ । इत्यमरः ॥ गजभक्षा ९ सुरभी १० महेरुणा ११ महारणा १२ ह्रादिनी १३ सिल्लकी १४ सल्लकी १५ । इति भरतः ॥ सुरभीरसा १६ शिल्लकी १७ । इति टीकान्तरम् ॥ सिङ्ककी १८ सिङ्कभूमिका १९ । इति शब्दरत्नावली ॥ अम्बस्त्री २० कुन्ती २१ । इति जटाधरः ॥
शल्लकीद्रवः, पुं, सिङ्ककः । इति जटाधरः ॥
शल्वः, पुं, शाल्वदेशः । इत्युणादिकोषः ॥